# અપરાધભઞ્જનસ્તોત્રમ

## Aparadhabanja Stotram

---

અપરાધ ભઞ્જન સ્તોત્રમ

શાન્તં પદ્માસનસ્થં શશિધરમુકુટં પઞ્ચવક્ત્રં ત્રિનેત્રં
શૂલં વજ્રં ચ ખડ્ગં પરશુમપિ વરં દક્ષિણાઙ્ગે વહન્તમ ।
નાગં પાશં ચ ઘણ્ટાં ડમરુકસહિતં ચાઙ્કુશં વામભાગે
નાનાલઙ્કારદીપ્તં સ્ફટિકમણિનિભં પાર્વતીશં ભજામિ ।।૧।।

વન્દે દેવમુમાપતિં સુરગુરું વન્દે જગત્કારણં
વન્દે પન્નગભૂષણં મૃગધરં વન્દે પશૂનાં પતિમ ।
વન્દે સૂર્યશશાઙ્કવહ્નિનયનં વન્દે મુકુન્દપ્રિયં
વન્દે ભક્તજનાશ્રયં ચ વરદં વન્દે શિવં શઙ્કરમ ।।૨।।

આદૌ કર્મપ્રસઙ્ગાત્કલયતિ કલુષં માતૃકુક્ષૌ સ્થિતઃ સન
વિણ્મૂત્રામેધ્યમધ્યે વ્યથયતિ નિતરાં જાઠરો જાતવેદાઃ ।
યદ્યદ્વા સાંબ દુઃખં વિષયતિ વિષમં શક્યતે કેન વક્તું
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ।।૩।।

બાલ્યે દુઃખાતિરેકો મલલુલિતવપુઃ સ્તન્યપાને પિપાસા
નો શક્યં ચેન્દ્રિયેભ્યો ભવગુણજનિતા જન્તવો માં તુદન્તિ ।
નાનારોગોત્થદુઃખાદ્રુદરપરિવશઃ શઙ્કરં ન સ્મરામિ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ।।૪।।

પ્રૌઢોઽહં યૌવનસ્થો વિષયવિષધરૈઃ પઞ્ચભિર્મર્મસન્ધૌ
દષ્ટો નષ્ટો વિવેકઃ સુતધન યુવતિસ્વાદુસૌખ્યે નિષણ્ણાઃ
શૈવે ચિન્તાવિહીનં મમ હૃદયમહો માનગર્વાધિરૂઢં
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ।।૫।।

વાર્ધક્યે ચેન્દ્રિયાણાં વિગતગતનતૈરાધિદૈવાદિતાપૈઃ
પાપૈર્રોગૈર્વિયોગૈરસદૃશવપુષં પ્રૌઢહીનં ચ દીનમ ।
મિથ્યામોહાભિલાષૈર્ભ્રમતિ મમ મનો ધૂર્જટેર્ધ્યાનશૂન્યં
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ।।૬।।

નો શક્યં સ્માર્તકર્મ પ્રતિપદગહનમત્યવાયાકુલાખ્યં
શ્રૌતં વાર્તા કથં મે દ્વિજકુલવિહિતે બ્રહ્મમાર્ગે ચ સારે ।

નષ્ટો ધર્મ્યો વિચારઃ શ્રવણમનનયોઃ કો નિદિધ્યાસિતવ્યઃ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ||૭||

સ્નાત્વા પ્રત્યૂષકાલે સ્નપનવિધિવિધામાહૃતં ગાઙ્ગતોયં
પૂજાર્થં વા કદાચિદ્બહુતરુગહનાત ખણ્ડબિલ્વૈકપત્રમ |
નાનીતા પદ્મમાલા સરસિ વિકસિતા ગન્ધપુષ્પે ત્વદર્થં
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ||૮||

દુગ્ધૈર્મધ્વાજ્યયુક્તૈર્દધિશતસહિતૈઃ સ્નાપિતં નૈવ લિઙ્ગં
નો લિપ્તં ચન્દનાદ્યૈઃ કનકવિરચિતૈઃ પૂજિતં ન પ્રસૂનૈઃ |
ધૂપૈઃ કર્પૂરદીપૈર્વિવિધરસયુતૈર્નૈવ ભક્ષ્યોપહારૈઃ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો || ૯||

નગ્નો નિઃસઙ્ગશુદ્ધસ્ત્રિગુણવિરહિતો ધ્વસ્તમોહાન્ધકારો
નાસાગ્રે ન્યસ્તદૃષ્ટિર્વિહરભવગુણૈર્નૈવ દૃષ્ટં કદાચિત |
ઉન્મત્તાવસ્થયા ત્વાં વિગતકલિમલં શઙ્કરં ન સ્મરામિ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ||૧૦||

ધ્યાનં ચિત્તે શિવાખ્યં પ્રચુરતરધનં નૈવ દત્તં દ્વિજેભ્યો
હવ્યં તે લક્ષસંખ્યં હુતવહવદને નાર્પિતં બીજમન્ત્રૈઃ |
નો જપ્તં ગાઙ્ગતીરે વ્રતપરિચરણૈ રુદ્રજાપ્યૈર્ન વેદૈઃ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ||૧૧||

સ્થિત્વા સ્થાને સરોજે પ્રણવમયમરુત્કુંભકે સૂક્ષ્મમાર્ગે
શાન્તે સ્વાન્તે પ્રલીને પ્રકટિતગહને જ્યોતિરૂપે પરાખ્યે |
લિઙ્ગં તત્બ્રહ્મવાચ્યં સકલમભિમતં નૈવ દૃષ્ટં કદાચિત
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભોઃ શ્રીમહાદેવ શંભો ||૧૨||

આયુર્નશ્યતિ પશ્યતો પ્રતિદિનં યાતિ ક્ષયં યૌવનં
પ્રત્યાયાન્તિ ગતાઃ પુનર્ન દિવસાઃ કાલો જગદ્ભક્ષકઃ |
લક્ષ્મીસ્તોયતરઙ્ગભઙ્ગચપલા વિદ્યુચ્ચલં જીવનં
તસ્માન્માં શરણાગતં શરણદ ત્વં રક્ષ રક્ષાધુના ||૧૩||

ચન્દ્રોદ્ભાસિતશેખરે સ્મરહરે ગઙ્ગાધરે શઙ્કરે
સર્પૈર્ભૂષિતકણ્ઠકર્ણવિવરે નેત્રોત્થવૈશ્વાનરે
દન્તિત્વક્કૃતિસુન્દરાંબરધરે ત્રૈલોક્યસારે હરે
મોક્ષાર્થં કુરુ ચિત્તવૃત્તિમમલામન્યૈસ્તુ કિં કર્મભિઃ ||૧૪||

કિં દાનેન ધનેન વાજિકરિભિઃ પ્રાપ્તેન રાજ્યેન કિં
કિં વા પુત્રકળત્રમિત્રપશુભિર્દેહેન ગેહેન કિમ |
જ્ઞાત્વૈતત્ક્ષણભઙ્ગુરં સપદિ રે ત્યાજ્યં મનો દૂરતઃ

સ્વાત્માર્થં ગુરુવાક્યતો ભજ ભજ શ્રીપાર્વતીવલ્લભમ ||૧૫||

કરચરણકૃતં વાક્કાયજં કર્મજં વા
શ્રવણનયનજં વા માનસં વાઽપરાધમ |
વિહિતમવિહિતં વા સર્વમેતત્ક્ષમસ્વ
જય જય કરુણાબ્ધે શ્રીમહાદેવ શંભો ||૧૬||

ગાત્રં ભસ્મસિતં સ્મિતં ચ હસિતં હસ્તે કપાલં સિતં
ખટ્વાઙ્ગં ચ સિતં સિતશ્ચ વૃષભઃ કર્ણે સિતે કુણ્ડલે|
ગઙ્ગાફેનસિતં જટાવલયકં ચન્દ્રઃ સિતો મૂર્ધનિ
સોઽયં સર્વસિતો દદાતુ વિભવં પાપક્ષયં શઙ્કરઃ ||૧૭||

ઇત્યપરાધભઞ્જનસ્તોત્રં સમાપ્તમ ||